# .. shrIgopAlAShTakam ..

# ॥ શ્રીગોપાલાષ્ટકમ્ ॥

## Document Information

Text title : gopAlAShTakam
File name : gopAlAShTakam.itx
Category : aShTaka
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Singanallur Ganesan singanallur at gmail.com
Proofread by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran psaeaswaran at gmail.com
Latest update : May 30, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીગોપાલાષ્ટકમ્ ॥

શ્રી ગણેશાય નમઃ ॥

યસ્માદ્વિશ્વં જાતમિદં ચિત્રમતર્ક્યં યસ્મિન્નાનન્દાત્મનિ નિત્યં રમતે વૈ ।
યત્રાન્તે સંયાતિ લયં ચૈતદશેષં તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૧॥

યસ્યાજ્ઞાનાજ્જન્મજરારોગકદમ્બં જ્ઞાતે યસ્મિન્નશ્યતિ તત્સર્વમિહાશુ ।
ગત્વા યત્રાયાતિ પુનર્નો ભવભૂમિં તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૨॥

તિષ્ઠન્નન્તર્યો યમયત્યેતદજસ્રં યં કશ્ચિન્નો વેદ જનોઽપ્યાત્મનિ સન્તમ્ ।
સર્વં યસ્યેદં ચ વશે તિષ્ઠતિ વિશ્વં તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૩ ॥

ધર્મોઽધર્મેણેહ તિરસ્કારમુપૈતિ કાલે યસ્મિન્મત્સ્યમુખૈશ્ચારુચરિત્રૈઃ ।
નાનારૂપૈઃ પાતિ તદા યોઽવનિબિમ્બં તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૪॥

પ્રાણાયામૈર્ધ્વસ્તસમસ્તેન્દ્રિયદોષા રુધ્વા ચિત્તં યં હૃદિ પશ્યન્તિ સમાધૌ ।
જ્યોતીરૂપં યોગિજનામોદનિમગ્નાસ્તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૫॥

ભાનુશ્ચન્દ્રશ્ચોડુગણૈશ્ચૈવ હુતાશો યસ્મિન્નૈવાભાતિ તડિચ્ચાપિ કદાપિ ।
યદ્ભાસા ચાભાતિ સમસ્તં જગદેતત્ તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૬॥

સત્યજ્ઞાનં મોદમવોચુર્નિગમા યં યો બ્રહ્મેન્દ્રાદિત્યગિરીશાર્ચિતપાદઃ ।
શેતેઽનન્તોઽનન્તતનાવમ્બુનિધૌ યસ્તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૭॥

શૈવાઃ પ્રાહુર્યં શિવમન્યે ગણનાથં શક્તિં ચૈકેઽર્કં ચ તથાન્યે મતિભેદાત્ ।
નાનાકારૈર્ભાતિ ય એકોઽખિલશક્તિસ્તં ગોપાલં સન્તતકાલં પ્રતિ વન્દે ॥ ૮॥

શ્રીમદ્ગોપાલાષ્ટકમેતત્ સમધીતે ભક્ત્યા નિત્યં યો મનુજો વૈ સ્થિરચેતાઃ ।
હિત્વા તૂર્ણં પાપકલાપં સ સમેતિ પુણ્યં વિષ્ણોર્ધામ યતો નૈવ નિપાતઃ ॥ ૯॥

ઇતિ શ્રીપરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં શ્રી ગોપાલાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Singanallur Ganesan singanallur at gmail.com
Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIgopAlAShTakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*